# शिष्यः सुतश्च
## shiShyaH sutashcha[1]

I

धनदनगरसौधशृङ्गभूषा -
यितकनकाञ्चितकुम्भका विरेजुः ।
अतिगतगगनाध्वमध्यकस्य
प्रकटमरीचिगणैर्दिवाकरस्य ॥ १ ॥

व्यलसदतितरां च तत्र नाना -
मणिसदनोज्ज्वलपार्श्वराजरथ्या ।
शिवगिरिमधिगच्छति स्म कश्चि -
द्धरणिसुरो हि यया महानुभावः ॥ २ ॥

सुमहितमुनिवेषकस्य तस्य
भ्रमरवृताम्बुजतुल्यकोमळास्ये ।
स्फुटतरमुदियाय न प्रशान्ति -
प्रचुरगुणोऽपि तु चारुवीरलक्ष्मीः ॥ ३ ॥

अजिनवरजटाजपाक्षमाला -
सकलशरीरगभस्मवल्कलेषु ।
न च युवयमिनः शमोचितेषु
प्रविलयमापदमुष्य दर्पलेशः ॥ ४ ॥

मदवृषभगतेर्दृढे तु तस्य
प्रतिपदविन्यसने स्फुटं बभासे ।
सदभिजनजनिश्च कृत्यनिष्ठा
हृदयसमुन्नतिरप्यतुल्यधैर्यम् ॥ ५ ॥

दिशि दिशि पुरवासिनश्च तस्थु -
र्विगतविचेष्टममुं विलोकयन्तः ।
सविनयमथ हस्तसंवृतास्याः
सविधगतान् वद मन्दमित्यवोचत् ॥ ६ ॥

अमलसुषमकेऽत्र साभिलाषै -
र्नयनशतैरळकापुरीरमण्यः ।
विकचकमलमाल्यमर्पयित्वा
स्वमनसि तद्विधपुत्रलब्धिमैच्छत् ॥ ७ ॥

सपदि समुदतिष्ठदासनस्थः
पथिकजनोऽपससार मार्गमध्यात् ।
पुरुभयबहुमानभक्तिसान्द्रे
पथि बत निस्तुलशान्तिराललास ॥ ८ ॥

[1] Orginal poem in Malayalam by Vallathol Narayana Menon. Translated into Sanskrit by N.V.P.Unithiri, Prof. of Sanskrit, University of Calicut, Kerala.

सुमहितसुरवाहिनीविगाही
विकसितकल्पकपुष्परेणुलिप्तः।
अकलुषसरसीजलस्थसौग -
न्धिकसुमगन्धयुतोऽपि शुद्धवायुः॥ ९॥

अतिनिभृततया विनीतियुक्तः
सविधमवाप तदीयपूजनाय।
परिघकरधृतः स्फुरत्स्फुलिङ्गः
परशुरयं प्रविकम्पको न कस्य॥ १०॥ युग्मकम्

प्रचुरशमधनः सपत्नसार्थ-
क्षतजसुनिर्मलपर्शुना किलायम्।
समरचतुरहेहयेशबाहू -
त्करसमिधस्तिलशश्वखण्ड शीघ्रम्॥ ११॥

बाढं महात्मा भृगुरामसंज्ञ -
स्तेजःप्रकर्षोज्ज्वलभूसुरोऽसौ।
धृताभिलाषः शिवदर्शनार्थं
जितेन्द्रियो याति जवादिदानीम्॥ १२॥

II

श्रीमानसौ कलशजन्ममुखाप्तकृष्ण -
प्रेमामृतस्तुतिवशीकृतराधिकेशः।
कामारिशिक्षितमहास्त्रगणोऽहितानां
कालोऽचिरेण हरशैलमनुप्रपेदे॥ १॥

कैलासमेत्य मणिगोपुरमप्यतीत्य
शैलादिमुख्यबहुमानमवाप्य सोऽयम्।
प्रच्छायशीतळवटद्रुतले लसन्त -
मद्रीशजारमणकेळिगृहं जगाम॥ २॥

श्रीरत्नमण्डपतले गृहरक्षकौ द्वौ
धीरौ स्थितावुभयपार्श्वगतौ कुमारौ।
हेरम्बकं च गुहमप्यवनम्य सोऽसौ
धीरश्चचाल सदनं रभसेन गन्तुम्॥ ३॥

"कैषा त्वरा? क्षणमिहास्व सखे गृहान्ते
विश्रान्तिमेति जनकोऽत्र मुहूर्तमेव"।
इत्थं प्रियोक्तिनिरतोऽनुजनिर्विशेषं
विघ्नेश्वरस्तदनु वारयति स्म रामम्॥ ४॥

"नायं विनोदसमयः खलु, मेऽविळम्बं
देवं निवेदयितुमस्ति च किञ्चने"ति।
रामो झटित्यखिलविघ्नपतेः प्रगाढ -
मालिङ्गनं समवधूय दृढं स तस्थौ॥ ५॥

"विश्राम्यतो रहसि सोदर, देशिकस्य
संदर्शनं किमुचितं त्वनिवेद्य पूर्वम्।
आयास्यतीह जनकोऽप्यविळम्बमेवे"-
त्येवं मुदा स जगृहे करमग्निभूश्च॥ ६॥

किन्तु द्विजश्रवणमाप न किञ्चिदेतत्
को वास्ति भार्गवमनोरथविघ्नकारी।
भङ्क्त्वाथ बन्धनमवाप कवाटमेव
गन्तुं च मन्दिरमसावनघोऽतिशीघ्रम्॥ ७॥

जातत्वरं जिगमिषोर्यमिनोऽसदेशे
भूयो निवेश्य निजदीर्घकरं गजास्यः।
"पूर्वं गुरोरनुमतिं च सखे न लब्ध्वा
गेहं प्रवेष्टुमल"मित्युरुहार्दमूचे॥ ८॥

"शिष्यः सदार्हति गुरोर्निकटे प्रवेशं;
नास्योपरोधजनकवपि देशकालौ।
यत्नस्तु ते विफल" इत्युदितो द्विजेन
विघ्नेश्वरः पुनरपि न्यरुधत् तमारात्॥ ९॥

"गच्छानि, मुञ्च", "न हि, मा प्रविश त्वमन्त"-
र्धिग्! वक्रवृत्तिविधयः किमु भार्गवेऽस्मिन्?।
वाग्वाद एष सुरभूसुरयोः प्रवर्ध्य
रोषोत्कटं बत! भुजाभुजि तत्र जातम्॥ १०॥

'नालं त्वहं शमयितुं समरेऽतिसक्ति-
भाजाविहे'त्यपससार मयूरवाहः।
एतद्विवादतुमुलध्वनिनाऽऽगतास्ते
शैवाग्र्यपार्षदजनाश्च तथैव तस्थुः॥ ११॥

शर्वाङ्कगो द्विजभटः स विमुच्य बन्धा-
द्दुर्वारनैजपरशुं भ्रमयाञ्चकार।
अभ्रामयज्झटिति तं चरणौ गृहीत्वा
रुद्रात्मजोऽपि दिवि गर्वितमात्तलीलम्॥ १२॥

तावत् किशोरगणनायकपाणिपद्मे
सोऽयं मुनिः पुनरभूद् भ्रमरायमाणः।
पाताळलोकनिवहानपि भूरिवार-
मालोकयत् स्वयमसौ तु किमिन्द्रजालम्॥ १३॥

संभ्राम्य चैनमखिले भुवने जवेनै-
वातिष्ठिपद् भुवि यथापुरमेकवीरम्।
देवेन दर्पदळनाय कृतो विनोदः
क्षोणीसुरे तु विपरीतफलः प्रवृत्तः॥ १४॥

उल्लासितभ्रुकुटिकोऽभवदत्र शूरो
वर्ण्यातिगे प्रथमजातपराभवेऽसौ।
देवैः कृतामपि कदाचन नाभिभूतिं
सेहे किल प्रथितभारतपूर्वरक्तम्॥ १५॥

III

अपेतशङ्कः स वृषाङ्कशिष्यो
मानी रुषाक्रान्तमनाः क्षणेन।
पित्रा प्रदत्तं निशितं कुठारं
निपातयामास तनूजगात्रे॥ १॥

रामायुधं भीमसुतस्य वाम -
गण्डप्रदेशे सहसा पपात।
तत्कुम्भिवक्त्रस्य च सव्यशृङ्गं
निर्घातघोरध्वनिना धरायाम्॥ २॥

गैरेयरागाञ्चितपादमूल-
कैलासशैलोन्नतशृङ्गशोभे।
आरक्तमूले पतिते तु तस्मिन्
शृङ्गे चकम्पे द्रुहिणाण्डभाण्डम्॥ ३॥

उन्नम्य शीर्षं पलितैश्च शुभ्रं
पश्यन् मृडानीगुरुशैलराजः।
दौहित्रगायां दुरवस्थितौ द्राग्
भीत्यद्भुताप्ळावितमानसोऽभूत्॥ ४॥

कैलासशैले कनकाभिषेकं
कुर्वन् निकामं स च कर्मसाक्षी।
पश्यामि नेतःपरमित्यकाण्डे
मेघोदरे हन्त तिरोबभूव॥ ५॥

कपोलभित्तिक्षतशोणितेन
काश्मीरकालिप्तवपुर्गजास्यः।
सन्ध्यारुणाभाङ्कितशारदाभ्र -
तुल्यो रराज स्फटिकावदातः॥ ६॥

स्कन्दस्तदास्मेष्ट ददंश जिह्वां
चण्डो गदां भ्रामयति स्म भद्रः।
रुरुर्निशश्वास करं व्यमृद्नात्
कुण्डोदरश्चाक्षि मिमील नन्दी॥ ७॥

अथाप्यसाधारणसत्त्वसाराः
क्रुधा न चक्रुः किमपि द्विजेन्द्रे।
विदुर्न के वा शिवपार्षदास्ते
भर्तुश्च शिष्यप्रतिपत्तिदार्ढ्यम्॥ ८॥

क्षणाद् गणानां समितौ प्रकीर्णे
हाहाप्रणादे ध्वनितौ तु नाके।
आजग्मतुस्तत्र विनायकस्य
पूज्यौ गुरू - सर्वजगद्गुरू तौ॥ ९॥

नष्टैकदन्तं रुधिराक्तदेहं
दृष्ट्वा गजास्यं पुरुसंभ्रमेण।
एतत्किमेतत्किमिति प्रधाव्य
गौरी सुतं स्वाङ्कतले दधार॥ १०॥

शिष्यं च पादे प्रणतं विनीतं
सुतं च कृत्ताङ्गकरक्तलिप्तम्।
कारुण्यवात्सल्यकषायितार्द्र -
दृष्ट्या निरैक्षिष्ट कलेशचूडः॥ ११॥

सुतं क्षताङ्गं परिचर्यया स -
भृत्या भवानी परितोषयन्ती।
षडाननादीश्वरसन्निधौ तद्
वृत्तं यथार्थं शृणुते स्म विज्ञात्॥ १२॥

क्षणं च स सव्यकरेण देवी
संहृत्य रम्यं श्ळथकेशपाशम्।
जाज्ज्वल्यमानोग्रदृशा समीक्ष्य
पार्श्वस्थितं वल्लभमाबभाषे॥ १३॥

लब्धा न किं ते गुरुदक्षिणेयं
शिष्याग्रगण्यादधुना यथेष्टम्?।
यत्किञ्चिदत्रायुधमस्ति शिष्टं
तच्चापि दत्वानुगृहाण शीघ्रम्॥ १४॥

सुतः क्षताङ्गो म्रियतां, न किं ते
महारथः सन्निदधाति शिष्यः।
रामो जगत्सत्तम एव नूनं ;
पात्रं परीक्ष्यैव ददीत विद्याम्॥ १५॥

नाळाय काष्ठं लभते स्म यस्माद्
वृक्षात् कुठारो निशितोग्रधारः।
छिनत्त्यसौ हन्त! तमेव मूल-
च्छेदं ; कृतज्ञो न करोति किं वा॥ १६॥

भूयोऽपि देवी बहुधा बभाषे
सुताङ्गभङ्गार्दितमानसा सा।
अत्रेश्वरस्तां न किमप्यवादी,-
दुत्कण्ठितं पार्श्वगतैर्वृथैव॥ १७॥

शिष्यस्य वीरोचितमेव कर्म,
पुत्रङ्गभङ्गो हृदयप्रमाथी।
अत्रेतिकर्तव्यविमूढचित्त -
श्चिन्ताकुलोऽस्थात् स हि सर्ववेत्ता॥ १८॥

IV

तिरोऽभवत् पञ्चषकैरमङ्गळा -
कुलः स रङ्गो निमिषैरिहाद्भुतम्।
क्रमेण सङ्गीतमरन्दसाद्रता -
मवाप कैलाससमीरमण्डलम्॥ १॥

अयत्नसिद्धोत्तममाधुरीझरी -
तरङ्गितश्रीमुरळीरवामृतम्।
लयेन सम्पूर्णचराचरोत्कर -
प्रमोहनं निर्गळति स्म मञ्जुळम्॥ २॥

पुराणदिव्यर्षिनिपीतमागळं
दुरापमास्वाद्य च गीतकामृतम्।
समाकुलीभूतहराद्रिरञ्जसा
बभूव हर्षैकविकारनिर्भरः॥ ३॥

प्रमोदरोमाञ्चमधात् सुतव्यथां
विहाय शैलेशसुतापि रंहसा।
नमो नमस्ते श्रुतिमात्रवेद्यसु -
स्वरूपसङ्गीतकलामहात्मने॥ ४॥

क्षणेन चाक्ष्णोरपि कर्णयोरिवो -
त्सवो महेशाद्रिनिवासिनामभूत्।
विहायसान्ते प्रससार कश्चन
प्रभाप्रकर्षोज्ज्वलदीप्तिमण्डलः॥ ५॥

क्रमात् प्रहर्षाद्भुतसम्भ्रमाकुले
गणेऽखिले स्तब्धतया तया स्थिते।
प्रदीप्ततेजःप्रसरोऽयमञ्जसा
समक्षमासीद् गिरिजामहेशयोः॥ ६॥

त्रिलोकभाण्डे प्रसृतोज्ज्वलासु त -
द्विलोचनासेचनकप्रदीप्तिषु।
अलोलतेजोमयनीललोहितो -
प्यधान्निकामं दिनदीपतुल्यताम्॥ ७॥

हरस्य सामीप्यमवाप्य रेजतु -
र्निरर्घसौभाग्यगुणाभिपूर्तिभिः।
परस्परस्पर्धिसरूपधारिणौ
महाद्भुतात्मा च महाद्भुताङ्गिका॥ ८॥

वलाहकश्यामळकोमळोऽयमु -
द्विलासवान् वैद्युतडम्बराम्बरः।
सुलाळ्यवेणूज्ज्वलपाणिपल्लवः
कलापिबर्हाङ्कितकम्रकुन्तळः॥ ९॥

अनेन यूना सह भाति मोहिनी
सुवासिताशातटचम्पकाङ्गिनी।
नवातपोद्यन्नळिनानना लसत -
प्रवाळनीकाशनिचोळशोभिनी॥ १०॥

कृताञ्जली वन्द्यपुराणदम्पती
प्रणेमतुस्तौ युवकोमळाकृती।
’मुरान्तक श्रीधर देवि राधिके
युवामितं स्वागत’मेवमञ्जसा॥ ११॥

सहर्षमानीय समेत्य सादरं
निवेशयामासतुरासनोपरि।
अवन्दिषातामथ पादपल्लवे -
ष्वमेयवीर्यौ च गणेशभार्गवौ॥ १२॥ युग्मकम्

भयेन वा देशिकदारशापतः
शुचा सुसौभ्रात्रविभङ्गतोऽथवा।
निकाममस्वास्थ्यविषण्णमानसं
स्वरूपवैवर्ण्यजुषं भृगूद्वहम्॥ १३॥

हह! प्रकामार्द्रमपश्यतामुभौ
सहस्रपत्रायतलोचनैरलम्।
महर्धिगोलोककुटुम्बमेधिना -
वनश्वरौ पावनदम्पतीश्वरौ॥ १४॥ युग्मकम्

अथैकदन्तं मधुवैरिवल्लभा
सुलाळयन्ती जननीव सत्वरम्।
प्रवाळतुल्येन पवित्रपाणिना
कपोलदेशं समवाहयच्च सा॥ १५॥

व्यरोपि गण्डक्षतमस्य तत्क्षणं
तथैव शैलेशसुतामनःक्षतम्।
गुणाधिकाप्लावितराधिकाकरः
प्रणम्रदानामृतशीतळः किल॥ १६॥

जवेन सा गोकुलनायिका मुदा
प्रशीतळं स्वाङ्कगतं विनायकम्।
सुकङ्कणोद्यन्मणिपल्लवोज्ज्वलद् -
भुजालताभ्यां परिरभ्य निर्भरम्॥ १७॥

समुन्नमद्वक्षसि मौक्तिकस्रजं
रदाग्रभासा परिवर्ध्य च स्वयम्।
विनिर्जितात्मप्रियवेणुनिस्वन -
श्रुतिप्रियैस्तामवदत् स्वरैरुमाम्॥ १८॥ युग्मकम्

"किशोरकेळीकृतचापलेषु का
क्रुधाकुलैवं जननी भविष्यति।
हरस्य शिष्यो भृगुजोऽभवद् यदा
तदाप्रभृत्येव सुतास्त्रयस्तव॥ १९॥

विचारय त्वं तनुजेष्वनुत्तमं
प्रकृष्टवात्सल्यममुं कुलान्वितम्।
प्रभूतगर्भप्रसवादिखेदजं
विना मनःक्लेशमभूदयं सुतः"॥ २०॥

"प्रतिविधिरिह दिष्टेनैव कुत्रापि दृष्टः
स्मृतिविहितमिभास्यस्यैकदन्तत्वमेव।
कुशलमतिकुमारज्यौतिषेरस्य चित्ते
स्फुरितचरमिदं स्याद् दैववैचित्र्यचित्रम्"॥ २१॥

हरिरप्यतिमृदुसुस्मितवदनोऽवददेवं
निकटे गुरुविनयं गुहमनिशं भजमानम्।
मधुपाकुलवनमाल्यकमणिकौस्तुभरम्ये
पुरुविस्तृतनिजवक्षसि परिरभ्य विरेजे॥ २२॥

कान्ते साकूतमन्दस्मितमधुरमभिप्रेक्ष्यमाणे भवानी
लज्जानम्राननेन्दुश्चरणनिपतितं राममाहन्त! मन्दम्।
आदायालिङ्ग्य मोदादतिभृशमुपलाळ्यैव तस्थौ; स धीरो
वीरो विश्वैकयोद्धा शिशुरिव विमलात्माऽऽम्बिकाङ्के रराज॥ २३॥

श्रुतो मेघस्येव स्फुटमथ नभस्यानकरव -
स्ततोऽभूत् संशुद्धस्फटिकसुमवर्षः सुरुचिरः।
कलापं चानीलं सुरपतिधनुःशोभमखिलं
वितत्यैवानृत्यद् गुहवरमयूरो मदकळम्॥ २४॥